दिनाङ्क :- 04.10.2026 प्रात: - 06:55

## अथवार्ताः

### गृहमन्त्री

भोपाल-नगरे समनुष्ठिते राज्यस्तरीय-'गोपालक-सम्मेलने' जनान् सम्बोधयन् केन्द्रीय-गृह-मन्त्री अमित-शाहः प्रावोचत् यत् 'भारतीय-न्याय-संहितायाः' निरवशेष-प्रवर्त्तने सति, भारतस्य दण्ड-न्याय-प्रणाली जगति निरतिशय-अर्वाचीना संभविष्यति।

गृह-मन्त्रिणा सबलं प्रोक्तं यत् अस्याः न्याय-संहितायाः पूर्ण-सञ्चारानन्तरम् 'अभियोग-पञ्जीकरणात्' आरभ्य 'सर्वोच्च-न्यायाधिकरणम्' यावत् सर्वेषां न्याय-व्यवहाराणाम् अन्तिम-निर्णयः वर्ष-त्रयाभ्यन्तरे एव सिद्धिमेष्यति।

---

### शिक्षा-मन्त्रालया

केन्द्रीय-शिक्षा-मन्त्रालयान्तर्गत-उच्च-शिक्षा-विभागेन असमीया, बङ्गला, मराठी, पालि, प्राकृत इति पञ्च-शास्त्रीय-भाषाणाम् अध्ययनाय पञ्च 'उत्कृष्ट-केन्द्राणि' अङ्गीकृतानि।

एतेन उपक्रमेन एतासां शास्त्रीय-भाषाणां भाषिक-साहित्यिक-न्यासस्य संरक्षणाय, सङ्गणकीकरणाय, उच्च-शैक्षणिक-अनुसन्धानाय, ज्ञानस्य च व्यापक-प्रचाराय समर्पित-संस्थागत-सहयोगः लप्स्यते।

---

### प्रवासी-भारतीय-दिवस

एकोनविंशतितमः 'प्रवासी-भारतीय-दिवस-समारोहः' आगामि-वर्षस्य जनवरी-मासस्य सप्तम-दिनाङ्कात् नवम-दिनाङ्कं यावत् पश्चिम-बङ्ग-राज्यस्य कोलकाता-नगरे समायोजयिष्यते।

अस्य महाधिवेशनस्य उद्घाटनं प्रधानमन्त्री नरेन्द्र-मोदी विधास्यति। राष्ट्रपतिः द्रौपदी-मुर्मूः च समापन-सत्रे अध्यक्षतां वहन्ती 'प्रवासी-भारतीय-सम्मान-पुरस्कारान्' प्रदास्यति।

---------------------------------------------------------

**लोकसभाध्यक्ष**

लोकसभाध्यक्षेण ओम्-बिर्ला इत्यनेन मन्त्रालयानुगुणं विभिन्नानां संसदीय-समितीनां पुनर्निर्माणं विहितम्। भाजपा-सांसदः भतृहरि-महताबः 'वित्त-समित्याः', काँग्रेस-सांसदः शशी थरूरः 'विदेश-कार्य-समित्याः', सुधीर-गुप्तः च 'रेल-समित्याः' अध्यक्षत्वेन नियुक्ताः।

तथैव चरणजीत-सिंह-चन्नी 'कृषि-पशुपालन-खाद्य-प्रसंस्करण-समित्याः', राधामोहन-सिंहः 'रक्षा-समित्याः', राजीव-प्रताप-रूडी 'जल-संसाधन-समित्याः', सप्तगिरि-उलका 'ग्रामीण-विकास-पञ्चायती-राज-समित्याः', निशिकान्त-दुबे च 'सञ्चार-सूचना-प्रौद्योगिकी-समित्याः' अध्यक्ष-पदम् अलङ्करिष्यन्ति।

---------------------------------------------------------

**वित्तमन्त्री**

अद्य नवदेहल्यां पञ्चम-'कौटिल्य-आर्थिक-सम्मेलनम्' सम्बोधयन्ती वित्त-मन्त्री निर्मला सीतारमण न्यगादीत् यत् गतदशके वित्तीय-संयमस्य, आधारभूत-संरचना-निवेशस्य, बैङ्किङ्ग्-परिष्काराणां, वस्तु-सेवा-करस्य अथ श्रम-संहितानां सुदृढ-क्रियान्वयनेन भारतस्य आर्थिक-स्थैर्यम् अतीव सुदृढम् अभवत्।

वित्तमन्त्री अब्रवीत् यत् विगत-चतुर्षु वर्षेषु वैश्विक-सङ्कटेषु सत्स्वपि भारतस्य आर्थिक-मूलतत्त्वानि सर्वथा अक्षुण्णानि सन्ति।

---------------------------------------------------------

**इज़राइल-प्रधानमन्त्रिणा**

इज़राइल-प्रधानमन्त्रिणा बेञ्जामिन्-नेतन्याहू-वर्येण आगामि-स्वातन्त्र्य-महोत्सवे मङ्गल-दीप प्रज्वालयितुं भारतीय-वैमानिकः कैप्टन-स्मित-मच्छारः प्रधानमन्त्री नरेन्द्र-मोदी च सगौरवम् आहूतौ।

दूरवाणी-सम्भाषण-वेलायां नेतन्याहू-महोदयेन कैप्टन-मच्छारस्य वीरतायाः भूरिशः प्रशंसा कृता, स च भारत-इज़राइल देशयोः धीर-नायकत्वेन उद्घोषितः।

परम्परागतरूपेण एतत् मङ्गल-ज्वाला-प्रज्वालनस्य गौरवम् केवलम् इज़राइल-नागरिकेभ्यः एव आरक्षितं भवति, येन एतत् आमन्त्रणम् अतीव दुर्लभं विशिष्टञ्च मन्यते।

---

<u>एशियाई-क्रीडायाः</u>

जापान-देशस्य नागोया-नगरस्य 'मिजुहो-पार्क'-क्रीडाङ्गणे अद्य सायङ्काले षड्-वादने 'आईचि-नागोया-एशियाई-क्रीडायाः भव्यं समापनं भविष्यति।

।। <u>इति वार्ता:</u>।।